শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে কিষ্কিন্ধাকাণ্ডে

॥ ত্রিষষ্টিতমঃ সর্গঃ ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

শ্রী রঙ্গরামানুজ মহাদেশিকন্

His Holiness śrīmad āṇḍavan śrīraṅgam

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

॥ ত্রিষষ্টিতমঃ সর্গঃ ॥

সম্পাতের্নরপুঙ্খোদ্গমস্তস্য ৱানরাণাং প্রোৎসাহনং কৃৎৱা তত উড্ডযনং ৱানরাণাং ততো দক্ষিণস্যাং প্রস্থানং চ

এতৈরন্যৈশ্চ বহুভির্ৱাক্যৈর্ৱাক্যৱিশারদঃ।
মাং প্রশস্যাভ্যনুজ্ঞাপ্য প্রৱিষ্টঃ স স্বমালযম্॥ **4.63.1**॥

কন্দরাৎ তু ৱিসর্পিৎৱা পর্ৱতস্য শনৈঃ শনৈঃ।
অহং ৱিন্ধ্যং সমারুহ্য ভৱতঃ প্রতিপালযে॥ **4.63.2**॥

অদ্য ৎৱেতস্য কালস্য ৱর্ষং সাগ্রশতং গতম্।
দেশকালপ্রতীক্ষোঽস্মি হৃদি কৃৎৱা মুনের্ৱচঃ॥ **4.63.3**॥

মহাপ্রস্থানমাসাদ্য স্বর্গতে তু নিশাকরে।
মাং নির্দহতি সন্তাপো ৱিতর্কৈর্বহুভির্ৱৃতম্॥ **4.63.4**॥

উদিতাং মরণে বুদ্ধিং মুনিৱাক্যৈর্নিৱর্তযে।
বুদ্ধির্যা তেন মে দত্তা প্রাণানাং রক্ষণে মম॥ **4.63.5**॥

সা মেঽপনযতে দুঃখং দীপ্তেৱাগ্নিশিখা তমঃ।
বুধ্যতা চ মযা ৱীর্যং রাৱণস্য দুরাত্মনঃ॥ **4.63.6**॥

পুত্রঃ সন্তর্জিতো ৱাগ্ভির্ন ত্রাতা মৈথিলী কথম্।
তস্যা ৱিলপিতং শ্রুৎৱা তৌ চ সীতাৱিযোজিতৌ॥ **4.63.7**॥

ন মে দশরথস্নেহাৎ পুত্রেণোৎপাদিতং প্রিযম্।
তস্য ৎৱেৱং ক্রূৱাণস্য সংহতৈর্ৱানরৈঃ সহ॥ **4.63.8**॥

উৎপেততুস্তদা পক্ষৌ সমক্ষং ৱনচারিণাম্।
স দৃষ্টৱা স্বাং তনুং পক্ষৈরুদ্গতৈররুণচ্ছদৈঃ॥ **4.63.9**॥

প্রহর্ষমতুলং লেভে ৱানরাংশ্চেদমব্রৱীৎ।
নিশাকরস্য রাজর্ষেঃ প্রসাদাদমিতৌজসঃ॥ **4.63.10**॥

আদিত্যরশ্মিনির্দগ্ধৌ পক্ষৌ পুনরুপস্থিতৌ।
যৌৱনে ৱর্তমানস্য মমাসীদ্ যঃ পরাক্রমঃ॥ **4.63.11**॥

তমেৱাদ্যাৱগচ্ছামি বলং পৌরুষমেৱ চ।
সর্ৱথা ক্রিযতাং যত্নঃ সীতামধিগমিষ্যথ॥ **4.63.12**॥

পক্ষলাভো মমাযং ৱঃ সিদ্ধিপ্রত্যযকারকঃ।
ইত্যুকত্ৱা তান্ হরীন্ সর্ৱান্ সম্পাতিঃ পতগোত্তমঃ॥ **4.63.13**॥

উৎপপাত গিরেঃ শৃঙ্গাজ্জিজ্ঞাসুঃ খগমো গতিম্।
তস্য তদ্ ৱচনং শ্রুৎৱা প্রতিসংহৃষ্টমানসাঃ।
বভূৱুর্হরিশার্দূলা ৱিক্রমাভ্যুদযোন্মুখাঃ॥ **4.63.14**॥

অথ পৱনসমানৱিক্রমাঃ
প্লৱগৱরাঃ প্রতিলব্ধপৌরুষাঃ।
অভিজিদভিমুখাং দিশং যযু -
র্জনকসুতাপরিমার্গণোন্মুখাঃ॥ **4.63.15**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে
কিষ্কিন্ধাকাণ্ডে ত্রিষষ্টিতমঃ সর্গঃ॥